# શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્ ૩

shrIrAmAShTottarashatanAmastotram 3

sanskritdocuments.org

May 12, 2018

# shrIrAmAShTottarashatanAmastotram 3

# શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્ ૩

## Sanskrit Document Information

Text title : rAmAShTottarashatanAmastotram 3

File name : rAmAShTottarashatanAmastotram3.itx

Category : raama, aShTottarashatanAma

Location : doc_raama

Author : Dinakar Ghaisas Guruji

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 12, 2018

*sanskritdocuments.org*

# શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્ ૩

શ્રીગણેશાય નમઃ ॥

વાલ્મીકિરુવાચ ।
યૈસ્તુ નામસહસ્રસ્ય પતનં ન ભવેત્સદા ।
રચિતં નિત્યપાઠાય તેભ્યઃ સ્વલ્પાક્ષરં મયા ॥ ૧॥

અષ્ટોત્તરશતં નામ્નામાદરેણ પઠન્તુ તે ।
રામપાદારવિન્દશ્રીપ્રાપ્તિં તેષાં ચ પ્રાર્થયે ॥ ૨॥

ગુણાનાં ચિન્તનં નિત્યં દુર્ગુણાનાં વિવર્જનમ્ ।
સાધકાનાં સદા વૃત્તિઃ પરમાર્થપરા ભવેત્ ॥ ૩॥

યથા તુ વ્યસને પ્રાપ્તે રાઘવઃ સ્થિરનિશ્ચયઃ ।
વિજયં પ્રાપ્તવાનન્તે પ્રાપ્નુવન્તુ ચ સજ્જનાઃ ॥ ૪॥

શ્રીગણેશાય નમઃ ।
સમ્રાડ્દક્ષિણમાર્ગસ્થઃ સહોદરપરીવૃતઃ ।
સાધુકલ્પતરુર્વશ્યો વસન્તઋતુસમ્ભવઃ ॥ ૫॥

સુમન્ત્રાદરસમ્પૂજ્યો યૌવરાજ્યવિનિર્ગતઃ ।
સુબન્ધુઃ સુમહન્માર્ગી મૃગયાખેલકોવિદઃ ॥ ૬॥

સરિત્તીરનિવાસસ્થો મારીચમૃગમાર્ગણઃ ।
સદોત્સાહી ચિરસ્થાયી સ્પષ્ટભાષણશોભનઃ ॥ ૭॥

સ્ત્રીશીલસંશયોદ્વિગ્નો જાતવેદ પ્રકીર્તિતઃ ।
સ્વયમ્બોધસ્તમોહારી પુણ્યપાદોઽરિદારુણઃ ॥ ૮॥

સાધુપક્ષપરો લીનઃ શોકલોહિતલોચનઃ ।
સંસારવનદાવાગ્નિઃ સહકાર્યસમુત્સુકઃ ॥ ૯॥

સેનાવ્યૂહપ્રવીણઃ સ્ત્રીલાઞ્છનકૃતસઙ્ગરઃ ।

સત્યાગ્રહી વનગ્રાહી કરગ્રાહી શુભાકૃતિઃ ॥ ૧૦॥

સુગ્રીવાભિમતો માન્યો મન્યુનિર્જ્જિતસાગરઃ ।
સુતદ્વયયુતઃ સીતાશ્વાર્ભગમનાકુલઃ ॥ ૧૧॥

સુપ્રમાણિતસર્વાઙ્ગઃ પુષ્પમાલાસુશોભિતઃ ।
સુગતઃ સાનુજો યોદ્ધા દિવ્યવસ્ત્રાદિશોભનઃ ॥ ૧૨॥

સમાધાતા સમાકારઃ સમાહારઃ સમન્વયઃ ।
સમયોગી સમુત્કર્ષઃ સમભાવઃ સમુદ્યતઃ ॥ ૧૩॥

સમદૃષ્ટિઃ સમારમ્ભઃ સમવૃત્તિઃ સમદ્યુતિઃ ।
સદોદિતો નવોન્મેષઃ સદસદ્વાચકઃ પુમાન્ ॥ ૧૪॥

હરિણાકૃષ્ટવૈદેહીપ્રેરિતઃ પ્રિયદર્શનઃ ।
હૃતદાર ઉદારશ્રીર્જનશોકવિશોષણઃ ॥ ૧૫॥

હનુમદ્વાહનોઽગમ્યઃ સુગમઃ સજ્જનપ્રિયઃ ।
હનુમદૂતસપન્નો મૃગાકૃષ્ટઃ સુખોદધિઃ ॥ ૧૬॥

હૃન્મન્દિરસ્થચિન્મૂર્તિર્મૃદૂ રાજીવલોચનઃ ।
ક્ષત્રાગ્રણીસ્તમાલાભો રુદનક્લિન્નલોચનઃ ॥ ૧૭॥

ક્ષીણાયુર્જનકાહૂતો રક્ષોઘ્નો ઋક્ષવત્સલઃ ।
જ્ઞાનચક્ષુર્યોગવિજ્ઞો યુક્તિજ્ઞો યુગભૂષણઃ ॥ ૧૮॥

સીતાકાન્તશ્ચિત્રમૂર્તિઃ કૈકેયીસુતબાન્ધવઃ ।
પૌરપ્રિયઃ પૂર્ણકર્મા પુણ્યકર્મપયોનિધિઃ ॥ ૧૯॥

સુરાજ્યસ્થાપકશ્ચાતુર્વર્ણ્યસંયોજકઃ ક્ષમઃ ।
દ્વાપરસ્થો મહાનાત્મા સુપ્રતિષ્ઠો યુગન્ધરઃ ॥ ૨૦॥

પુણ્યપ્રણતસન્તોષઃ શુદ્ધઃ પતિતપાવનઃ ।
પૂર્ણોઽપૂર્ણોઽનુજપ્રાણઃ પ્રાપ્યો નિજહૃદિ સ્વયમ્ ॥ ૨૧॥

વૈદેહીપ્રાણનિલયઃ શરણાગતવત્સલઃ ।
શુભેચ્છાપુર્વકં સ્તોત્રં પઠનીયં દિને દિને ।
અષ્ટોત્તરશતં નામ્નાં રાઘવસ્ય પઠેન્નરઃ ॥ ૨૨॥

ઇષ્ટં લબ્ધ્વા સદા શાન્તઃ સામર્થ્યસહિતો ભવેત્ ।
નિત્યં રામેણ સહિતો નિવાસસ્તસ્ય વા ભવેત્ ॥ ૨૩॥

ઇતિ શ્રી અનન્તસુતશ્રીદિવાકરવિરચિતં
શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રં ૩ સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIrAmAShTottarashatanAmastotram 3*

pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*